**अपदिश** अव्य० दिशयोर्मध्ये अप+दिशा+अव्ययी०। दिशोर्मध्ये विदिक् इति कोण इति च ख्याते। दिक्शब्देन समासे तु शरदा० टच् इति भेदः।

**अपदिष्ट** त्रि० अप+दिश—कर्म्मणि क्त। कथिते प्रयुक्ते। "कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधेति" भाषा०।

**अपदेश** पु० अप+दिश—घञ्। लक्ष्ये, स्वरूपाच्छादनरूपे, छले, निमित्ते स्थाने च। "रक्षापदेशान्मुनिहोमधेनो रिति" रघुः। "न धर्म्मस्यापदेशेन पापं कृत्वा व्रतं चरेदिति"। "भक्ष्यभोज्यापदेशैश्च ब्राह्मणानां च दर्शनैः"। "शौर्य्यकर्म्मापदेशेनेति" "साध्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः। अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वत इति" च मनुः। उपदेशे च। "दीक्षाया अपदेशात्" कात्या० २२, १२२। अपदेश उपदेश इत्यर्थः। अपकृष्टोदेशः प्रा० ब० वा कृष्टपदलोपः। अपकृष्टदेशे, अनुचितस्थाने च।

**अपदेश्य** त्रि० अप+दिश—कर्म्मणि यत्। छलेन कथनीये। अपदेशे अनुचितस्थाने भवः दिगा० यत्। अनुचितस्थानभवे त्रि०। 'अपदिश्यापदेश्यञ्च पुनर्यस्त्वपधावतीति" मनुः। यत्र यस्य दानमुचितं ततोऽन्यत्र स्थाने दानस्यानुचितत्वात् तथात्वम्।

**अपद्रव्य** न० अपकृष्टं द्रव्यम् प्रा०ब० वा कृष्टभागलोपः। अपकृष्टद्रव्ये 'अदूषितानां द्रव्याणां दूषणे भेदने तथेति" मानवव्याख्यायाम् "अपद्रव्यप्रदानेन दूषणे" इति कुल्लूकः।

**अपद्वार** न० अपकृष्टं द्वारं प्रा०ब० वा कृष्टलोपः। अपकृष्टद्वारे "निर्य्ययासुरपद्वारैरिति" सुश्रुतः।

**अपधा** स्त्री अप+वारणे धा—भावे स्त्रियाम् अङ्। वारणार्थं निरोधे, "गा उदाजदपधा बलस्य" इति ऋ० २,१२,३। "अपधाअपधायाः निरोधादिति" भा०।

**अपध्यान** न० अपकृष्टं ध्यानम् प्रा०स०। अनिष्टचिन्तने। वैपरीत्यचिन्तने च।

**अपध्वंस** पु० अप+ध्वन्स—भावे घञ्। नाशे, यस्य यथारूपमुचितं ततः प्रच्यवे च। "पथामपध्वंसेनैत्विन्द्र" इति अथ० १,२,५।

**अपध्वंसज** पुंस्त्री अपध्वस्यतेऽनेन अपध्वंसः वर्णानां भिन्नरूपतासंपादकः सङ्करस्तस्माज्जायते जन—ड ५त०। भिन्नवर्णसङ्गमजाते करणादौ सङ्कीर्णवर्णे। "शूद्राणां तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृता" इति मनुः "ये द्विजानामपसदा ये चापध्वंसजाः स्मृता" इति च मनुः। तेषां पित्रोः समवर्णत्वाप्राप्तेः स्वरूपप्रच्यवेन जातत्वात् तथात्वम्।

**अपध्वंसिन्** त्रि० अपध्वंसयति अप+ध्वन्स—णिच्—णिनि। नाशके। "सर्व्वैनसामपध्वंसि जप्यं स्यादघमर्षणमिति" मनुः

**अपध्वस्त** त्रि० अप+ध्वन्स—क्त। निन्दिते, परित्यक्ते अवचूर्णिते च।

**अपध्वान्त** न० अपकृष्टं ध्वान्तं ध्वनितम् ध्वन—क्त वेदे नि० स्वनार्थेऽपि इडभावः। भिन्नकांस्यस्वरसमे शब्दे "वृहस्पतेरपध्वान्तमिति" छा०उप०। वार्हस्पत्यं तदपध्वान्तं भिन्नकांस्यस्वरसममिति" भा०।

**अपनय** पु० अप+नी—अच्। दूरीकरणे स्थानान्तरनयने च। "अपनयो वाऽदृष्टत्वादिति" कात्या० २५,८,२। "तस्य तण्डुलापनयो वचनादिति" कात्या० २५,४४,३। "अपनयतेर्दूरीकरणार्थत्वात्तथात्वम् अतएव "अविनयमपनय विष्णो!" इति शङ्कराचार्य्येण दूरीकरणार्थतया प्रयुक्तम्। अपकृष्टो नयो वैपरीत्ये प्रा०स० वा। निन्दितनीतौ दुष्टनीतौ च। अपकारे "ततः सपत्नापनयस्मरणानुशयस्फुरेति" माघः।

**अपनयन** न० अप+नी—ल्युट्। दूरीकरणे, खण्डने च। अपनीयतेऽनेन अप+नी—करणे ल्युट्। अपकारसाधने। अपगतं नयनं यस्य। नेत्रहीने त्रि०।

**अपनस** त्रि० अपगता नासिका यस्य प्रा०ब० नसादेशश्च। अपगतनासिके। "असिं कौक्षेयमुद्यम्य चकारापनसं मुखमिति" भट्टिः। [सारिते च।

**अपनीत** त्रि० अप+नी—क्त। खण्डिते, दूरीकृते, अप-

**अपनुत्ति** स्त्री अप+नुद—क्तिन्। खण्डने दूरीकरणे। 'परिजनश्रमापनुत्त्यै" इति छा०उप०। "पापानामपनुत्तये इति" "गुरुतल्पापनुत्तये" इति च मनुः।

**अपनुद** त्रि० अप+नुद—क। दूरीकारके, खण्डके, शोधके च।

**अपनोद** पु० अप+नुद—भावे घञ्। खण्डने, दूरीकरणे, अपसारणे च। "तस्यापनोदाय फलप्रवृत्ताविति" रघुः। "ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रिय" इति मनुः।

**अपनोदन** न० अप+नुद—ल्युट्। अपसारणे खण्डने च 'एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनमिति" मनुः। कर्त्तरि ल्यु। दूरीकारके त्रि०। "यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः। तथाऽघमर्षणं जप्यं सर्वपापापनोदनम्" इति 'पराकोनाम कृच्छ्रोऽयं सर्वपापापनोदन" इति च मनुः।

**अपन्न** त्रि० पत—क्त नि०न०त०। अपतिते। "आशवोऽपन्नगृहस्येति" यजु०६,२४। न पन्नं पतितं गृहं यस्येति" वेददीपः। पन्नम इत्यत्र हि पन्नशब्दस्य पतितार्थकत्वं दृष्टम्।